दिनाङ्क :- 01.01.2026

प्रात: - 06:55

## प्रधानमन्त्रिणा/ नवदिल्ल्यां

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः नवदिल्ल्यां प्रो-एक्टिव-गवर्नेन्स् तथा समयोचित-इम्प्लीमॅन्टेशन् इत्यस्य कृते प्रगत्याः बहुविध-मञ्चस्य पञ्चाशत्-तमसभायाः अध्यक्षता कृता। सभायां श्रीमोदी, मार्ग, रेलमार्ग, विद्युत्, जलसंसाधन, अङ्गारक-इत्यादिषु क्षेत्रेषु पञ्चानाम् महत्त्वपूर्णानां मूलसंरचनापरियोजनानां समीक्षां विहितवान्। एते प्रकल्पाः पञ्चराज्येषु विस्तृताः सन्ति, तेषां संचितव्ययः चत्वारिंशत् सहस्रकोटिरूप्यकादप्यधिकम् अस्ति।

## प्रधानमन्त्रिणा नरेन्द्रमोदिना

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् केन्द्रिय मन्त्रिमण्डलेन ओडिशा-राज्ये षड्-विंशत्यधिक-त्रिशत-तमस्य राष्ट्रिय-राजमार्गस्य विस्तारणस्य सुदृढीकरणस्य च अनुमोदनं महत्त्वपूर्णः प्रकल्पः अस्ति। सामाजिकान्तर्जालीये सन्देशे श्रीमोदीः अवदत् यत् अनया यात्रया गतिः वर्धिता, गजपति-रायगढ-कोरापुट- इत्येतेषु सम्पर्कः च संवर्धिष्यते ।

## मंत्रिमंडल-निर्णयाः

महाराष्ट्र-राज्ये षट्प्रभागीयस्य नासिक्-सोलापुर्-अक्कल्कोट्-मार्गस्य निर्माणाय आर्थिककार्य-मन्त्रिणां समितिः अनुमतिं दत्तवती। पादोनचतुश्शत- किलोमीटरपरिमितः राजमार्गः प्रायः सार्धैकशतोत्तरैकोनविंशतिसहस्र- कोटि-रूप्यकाणां व्ययेन निर्मितः

भविष्यति। नवदेहल्यां अद्यतनस्य मन्त्रिमण्डलस्य निर्णयानाम् विषये प्रसारमाध्यमान् सम्बोधयन् सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः अवदत् यत्, नासिक-सोलापुर-अक्कल्कोट्-मार्गप्रकल्पः नासिक, अहिल्या-नगर- सोलापुर- इत्यादीनां महत्त्वपूर्णानां क्षेत्रीयनगराणां कृते कुर्नूल-नगरेण सह सम्पर्कं कल्पयिष्यते। प्रधानमन्त्री गतिशक्ति-राष्ट्रिय-बृहत्-योजनायाः सिद्धान्तान्तर्गतं एकीकृत-परिवहन-सौकर्याभिवृद्धये एतत् महत्त्वपूर्णं सोपानम् अस्तीति।

केन्द्रीयमन्त्रिमण्डलेन ओडिशा-राज्ये राजमार्गसंख्या-षड्विंशत्युत्तरत्रिंशतम् इत्यस्य परिष्काराय अपि आर्थिकानुमतिः प्रदत्ता। श्रीवैष्णवः अवदत् अस्य राजमार्गस्य उन्नयनेन गजपति, रायगढ, कोरापुट् इत्येतानि महत्त्वाधायीनि-जनजातीय-मण्डलानि महल्लाभं प्राप्यस्यन्तीति। केन्द्रीय मंत्रिमण्डलेन गतदिने षड् पङ्क्तियुताय नाशिक-सोलापुर मार्गाय अनुमतिः प्रदत्ता। नव दिल्ल्यां मन्त्रिमण्डलस्य आर्थिक-समितेः उपवेशनस्य अनन्तरं सूचना प्रसारण मंत्री अश्विनी वैष्णवः अवोचत् यत् नाशिक-सोलापुर वीथिपथः बहुभ्यः महत्वपूर्ण-नगरेभ्यः सौविध्यं प्रदास्यति। श्रीमतावैष्णवेन उक्तं यत् इयं मूलभूतसंरचना प्रधानमंत्री गतिशक्ति राष्ट्रीयपरियोजना सिद्धांतस्य अंतर्गतम् एकीकृत-परिवहन-संरचनायाः विकासे सौविध्य-प्रदानाय महत्वपूर्ण-पदक्षेपो वर्तते।

<u>डी. आर्. डी. ओ.-मिसैल्सः</u>

रक्षा-अनुसन्धान-विकास-सङ्घटनम् इत्यनेन ओडिशा-तटस्य समीपे एकेनैव प्रक्षेपकेण द्रुतगत्या द्वयोः प्रलय-प्रक्षेपास्त्रयोः सातत्य-प्रक्षेपणम् सफलतया कृतम्। उपयोक्तृ-मूल्यांकन-परीक्षणस्य भागरूपेण उड्डयन-परीक्षणं कृतमासीत्। रक्षामन्त्रालयेन उक्तं

यत् उभेऽपि प्रक्षेपास्त्रे सर्वाण्यपि उड्डयनलक्ष्यानि साधयितुं अपेक्षितं पथम् अनुसरती, चण्डीपुरस्य एकीकृतपरीक्षाक्षेत्रे सफलताम् अभजताम्।

राजनाथ/प्राणप्रतिष्ठाः

अयोध्यायाः रामललायाः प्रतिष्ठा धार्मिक-आध्यात्मिक-पर्यटनस्य केन्द्रं जातम्, भगवतः रामस्य महिमा न केवलं भारते अपितु सम्पूर्णे विश्वे विद्योतते। अयोध्यानगरस्य श्रीरामजन्मभूमिमन्दिरस्य भगवतः रामलला इत्यस्य प्रतिष्ठायाः द्वितीयवार्षिकोत्सवस्य अवसरे मुख्यमन्त्री योगी आदित्यनाथेन सह रक्षामन्त्री भागं गृहीतवान्। रक्षामंत्री राजनाथसिंहः ह्यः राममन्दिरसङ्कुलस्य अन्नपूर्णा-मन्दिरे ध्वजारोहणं कृत्वा प्राणप्रतिष्ठायाः द्वितीयवार्षिक्याः अवसरे पूजायाम् सम्मिलितः अभवत्। अत्रावसरे श्रीसिंहेन सह उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथोऽपि आसीत्। राममन्दिर-परिसरस्य सप्तमन्दिरेषु अन्नपूर्णा-मन्दिरम् अन्यतममस्ति। गतमासस्य पञ्चविंशे दिनाङ्के, प्रधानमन्त्रिणा नरेन्द्रमोदिना राममन्दिरस्य उपरि काषायध्वजारोहणं कृतमासीत्।

नववर्षस्य

नववर्षस्य स्वागतार्थं क्रीडनक विस्फोटकादीभिः च आनन्दं लभन्ते जनाः। राष्ट्रपतिः द्रौपदी मुर्मुः नव-वर्षस्य पूर्व- संध्यायां जनेभ्यः शुभकामनाः अयच्छत्।